श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीपराशरभट्टार्य विरचितं

# ॥ श्री रङ्गनाथ स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री रङ्गनाथ स्तोत्रम् ॥

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥

सप्तप्राकारमध्ये सरसिज मुकुलोद्भासमाने विमाने
कावेरी मध्यदेशे मृदुतरफणिराड्भोगपर्यङ्कभागे।
निद्रामुद्राभिरामं कटिनिकटशिरःपार्श्वविन्यस्तहस्तं
पद्माधात्रीकराभ्यां परिचितचरणं रङ्गराजं भजेऽहम्॥ १ ॥

कस्तूरीकलितोर्ध्वपुण्ड्रतिलकं कर्णान्तलोलेक्षणं
मुग्धस्मेर मनोहराधरदळं मुक्ता किरीटोज्ज्वलम्।
पश्यन्मानस पश्यतोहररुचिं पर्याय पङ्केरुहं
श्रीरङ्गाधिपतेः कदा नु वदनं सेवेय भूयोऽप्यहम्॥ २ ॥

कदाऽहं कावेरीतटपरिसरे रङ्गनगरे
शयानं भोगीन्द्रे शतमखमणि श्यामलरुचिम्।
उपासीनः क्रोशन् मधुमथन! नारायण! हरे!
मुरारे! गोविन्देत्यनिशम् अनुनेष्यामि दिवसान्॥ ३ ॥

कदाऽहं कावेरी विमलसलिले वीतकलुषो
भवेयं तत्तीरे श्रममुषि वसेयं घनवने।
कदा वा तत् पुण्ये महति पुळिने मङ्गळगुणं
भजेयं रङ्गेशं कमलनयनं शेषशयनम्॥ ४ ॥

पूगीकण्ठद्वय ससरसस्निग्ध नीरोपकण्ठां
आविर्मोद स्तिमितशकुना नूदित ब्रह्मघोषाम्।
मार्गे मार्गे पथिकनिवहैः उञ्छ्यमानापवर्गां
पश्येयं तां पुनरपि पुरीं श्रीमतीं रङ्गधाम्नः॥ ५ ॥

न जातु पीतामृत मूर्छितानां
नाकौकसां नन्दनवाटिकासु।
रङ्गेश्वर त्वत्पुरमाश्रितानां
रथ्याशुनामन्यतमो भवेयम्॥ ६ ॥

श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रि सिंहाचलौ
श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम्।
श्रीमद्द्वारवती प्रयागमथुरायोध्यागयाः पुष्करं
सालग्रामगिरिं निषेव्य रमतेरामानुजोऽयं मुनिः॥ ७ ॥

असन्निकृष्टस्य निकृष्टजन्तोः
मिथ्यापवादेन करोषि शान्तिम्।
ततो निकृष्टे मयि सन्निकृष्टे
कां निष्कृतिं रङ्गपते करोषि॥ ८ ॥

॥ इति श्री रङ्गनाथ स्तोत्रम् समाप्तम् ॥